# Shri Rudra Sahasranamavali

# श्रीरुद्रसहस्रनामावलिः

## Document Information

Text title : rudrasahasranAmavalibhringiriTisamhitA

File name : rudrasahasranAmAvalIbhringiriTi.itx

Category : sahasranAmAvalI, shiva

Location : doc_shiva

Proofread by : Sneha Sudha snehasudha13 at gmail.com

Description/comments : See corresponding sahasranAma stotra

Latest update : April 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीरुद्रसहस्रनामावलिः

न्यासः ।
अस्य श्रीरुद्रसहस्रनामस्तोत्रमहामन्त्रस्य ।
भगवान् महादेव ऋषिः । देवीगायत्रीछन्दः ।
सर्वसंहारकर्ता श्रीरुद्रो देवता । श्रींबीजम् । रुं शक्तिः ।
द्रं कीलकम् । श्रीरुद्र प्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ अङ्गुष्ठाभ्यां नमः । नं तर्जनीभ्यां नमः ।
मं मध्यमाभ्यां नमः । भं अनामिकाभ्यां नमः ।
गं कनिष्ठिकाभ्यां नमः । वं करतलकरपृष्ठाभ्यां नमः ।

तें हृदयाय नमः । रुं शिरसे स्वाहा । द्रां शिखायै वषट् ।
यं कवचाय हुम् । ॐ नेत्रत्रयाय वौषट् । श्रीं अस्त्राय फट् ।
भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम् ।
नेत्राणां द्विसहस्रकैः परिवृतमत्युग्रचर्माम्बरं
हेमाभं गिरिशं सहस्रशिरसं आमुक्तकेशान्वितम् ।
घण्टामण्डितपादपद्मयुगलं नागेन्द्रकुम्भोपरि
तिष्ठन्तं द्विसहस्रहस्तमनिशं ध्यायामि रुद्रं परम् ॥

पञ्चपूजा ।
लं पृथिव्यात्मने गन्धं समर्पयामि ।
हं आकाशात्मने पुष्पाणि समर्पयामि ।
यं वाय्वात्मने धूपमाघ्रापयामि ।
रं वह्न्यात्मने दीपं दर्शयामि ।
वं अमृतात्मने अमृतं निवेदयामि ।
सं सर्वात्मने सर्वोपचारान्समर्पयामि ।

अथ श्रीरुद्रसहस्रनामावलिः ।

ॐ ॐ नमो भगवते रुद्राय नमः । ॐ ऐं ह्रीं जपस्तुत्याय ।
ॐ पदवाचकाय । ॐकारकर्त्रे । ॐकारवेत्त्रे । ॐकारबोधकाय ।
ॐकारकन्दरासिंहाय । ॐकारज्ञानवारिधये । ॐकारकन्दाकुरिकाय ।
ॐकारवदनोज्ज्वलाय । ॐकारकाकुदाय । ॐकारपदवाचकाय ।
ॐकारकुण्डसप्तार्चये । ॐकारावालकल्पकाय । ॐकारकोकमिहिराय ।
ॐकारश्रीनिकेतनाय । ॐकारकण्ठः । ॐकारस्कन्धः । ॐकारदोर्युगाय ।
ॐकारचरणद्वन्द्वाय नमः । २०

ॐ ॐकारमणिपादुकाय नमः । ॐकारचक्षुषे । ॐकारश्रुतये ।
ॐकारभ्रूर्युगाय । ॐकारजपसुप्रीताय । ॐकारैकपरायणाय ।
ॐकारदीर्घिकाहंसाय । ॐकारजपतारकाय । ॐकारपदतत्त्वार्थाय ।
ॐकाराम्भोधिचन्द्रमसे । ॐकारपीठमध्यस्थाय । ॐकारार्थप्रकाशकाय ।
ॐकारपूज्याय । ॐकारस्थिताय । ॐकारसुप्रभवे । ॐकारपृष्ठाय ।
ॐकारकटये । ॐकारमध्यमाय । ॐकारपेटकमणये । ॐकाराभरणोज्ज्वलाय
नमः । ४०

ॐ ॐकारपञ्जरशुकाय नमः । ॐकारार्णवमौक्तिकाय ।
ॐकारभद्रपीठस्थाय । ॐकारस्तुतविग्रहाय । ॐकारभानुकिरणाय ।
ॐकारकमलाकराय । ॐकारमणिदीपार्चये । ॐकारवृषवाहनाय ।
ॐकारमयसर्वाङ्गाय । ॐकारगिरिजापतये । ॐकारमाकन्दविकाय ।
ॐकारादर्शबिम्बिताय । ॐकारमूर्तिः । ॐकारनिधिः । ॐकारसन्निभाय ।
ॐकारमूर्द्ध्ने । ॐकारफालाय । ॐकारनासिकाय । ॐकारमण्डपावासाय ।
ॐकाराङ्गणदीपकाय नमः । ६०

ॐ ॐकारमौलि: नमः । ॐकारकेलिः । ॐकारवारिधये । ॐकारारण्यहरिणाय
।
ॐकारशशिशेखराय । ॐकारारामन्दाराय । ॐकारब्रह्मवित्तमाय ।
ॐकाररूपः । ॐकारवाच्याय । ॐकारचिन्तकाय । ॐकारोद्यानबर्हिणे ।
ॐकारशरदम्बुदाय । ॐकारवक्षसे । ॐकारकुक्ष्ये । ॐकारपार्श्वकाय ।
ॐकारवेदोपनिषत् । ॐकाराध्वरदीक्षिताय । ॐकारशेखराय ।
ॐकारविश्वकाय । ॐकारसक्थये नमः । ८०

ॐ ॐकारजानुः नमः । ॐकारगुल्फकाय । ॐकारसारसर्वस्वाय ।

ॐकारसुमषट्पदाय । ॐकारसौधनिलयाय । ॐकारास्थाननर्तकाय । ॐकारहनवे । ॐकारवटवे । ॐकारज्ञेयाय । ॐ नं बीजजपप्रीताय । ॐ यों भं मं स्वरूपकाय । ॐपदातीतवस्त्वंशाय । ओमित्येकाक्षरात्पराय । ॐपदेन संस्तव्याय । ॐकारध्येयाय । ॐ यं बीजजपाराध्याय । ॐकारनगराधिपाय । ॐ वं तें बीजसुलभाय । ॐ रुं द्रां बीजतत्पराय । ॐ शिवायेति सञ्जप्याय नमः । १००

ॐ ॐ ह्रीं श्रीं बीजसाधकाय नमः । नकाररूपाय । नादान्ताय । नारायणसमाश्रिताय । नगप्रवरमध्यस्थाय । नमस्कारप्रियाय । नटाय । नगेन्द्रभूषणाय । नागवाहनाय । नन्दिवाहनाय । नन्दिकेशसमाराध्याय । नन्दनाय । नन्दिवर्धनाय । नरकक्लेशशमनाय । निमेषाय । निरुपद्रवाय । नरसिंहार्चितपदाय । नवनागनिषेविताय । नवग्रहार्चितपदाय । नवसूत्रविधानवित् नमः । १२०

ॐ नवचन्दनलिप्ताङ्गाय नमः । नवचन्द्रकलाधराय । नवनीतप्रियाहाराय । निपुणाय । निपुणप्रियाय । नवब्रह्मार्चितपदाय । नगेन्द्रतनयाप्रियाय । नवभस्मविदिग्धाङ्गाय । नवबन्धविमोचकाय । नववस्त्रपरीधानाय । नवरत्नविभूषिताय । नवसिद्धसमाराध्याय । नामरूपविवर्जिताय । नाकेशपूज्याय । नादात्मने । निर्लेपाय । निधनाधिपाय । नादप्रियाय । नदीभर्त्रे । नरनारायणार्चिताय नमः । १४०

ॐ नादबिन्दुकलातीताय नमः । नादबिन्दुकलात्मकाय । नादाकाराय । निराधाराय । निष्प्रभाय । नीतिवित्तमाय । नानाक्रतुविधानज्ञाय । नानाभीष्टवरप्रदाय । नामपारायणप्रीताय । नानाशास्त्रविशारदाय । नारदादि समाराध्याय । नवदुर्गार्चनप्रियाय । निखिलागम संसेव्याय । निगमाचारतत्पराय । निचेरवे । निष्क्रियाय । नाथाय । निरीहाय । निधिरूपकाय । नित्यक्रुद्धाय नमः । १६०

ॐ निरानन्दाय नमः । निराभासाय । निरामयाय । नित्यानपायमहिमाय । नित्यबुद्धाय । निरंकुशाय । नित्योत्साहाय । नित्यनित्याय । नित्यानन्दायस्वरूपकाय । निरवद्याय । निशुम्भघ्नाय । नदीरूपाय । निरीश्वराय । निर्मलाय । निर्गुणाय । नित्याय । निरपायाय । निधिप्रदाय । निर्विकल्पाय । निर्गुणस्थाय नमः । १८०

ॐ निषङ्गिने नमः । नीललोहिताय । निष्कलंकाय । निष्प्रपञ्चाय ।

निर्द्वन्द्वाय । निर्मलप्रभाय । निस्तुलाय । नीलचिकुराय । निस्सङ्गाय ।
नित्यमङ्गलाय । नीपप्रियाय । नित्यपूर्णाय । नित्यमङ्गलविग्रहाय ।
नीलग्रीवाय । निरुपमाय । नित्यशुद्धाय । निरञ्जनाय ।
नैमित्तिकार्चनप्रीताय । नवर्षिगणसेविताय ।
नैमिशारण्यनिलयाय नमः । २००

ॐ नीलजीमूतनिस्वनाय नमः । मकाररूपाय । मन्त्रात्मने ।
मायातीताय । महानिधये । मकुटाङ्गदकेयूरकंकणादिपरिष्कृताय ।
मणिमण्डपमध्यस्थाय । मृडानीपरिसेविताय । मधुराय । मधुरानाथाय ।
मीनाक्षीप्राणवल्लभाय । मनोन्मनाय । महेष्वासाय । मान्धानृपति पूजिताय ।
मयस्कराय । मृडाय । मृग्याय । मृगहस्ताय । मृगप्रियाय ।
मलयस्थाय नमः । २२०

ॐ मन्दरस्थाय नमः । मलयानिलसेविताय । महाकायाय । महावक्त्राय ।
महादंष्ट्राय । महाहनवे । महाकैलासनिलयाय । महाकारुण्यवारिधये ।
महागुणाय । महोत्साहाय । महामङ्गलविग्रहाय । महाजानवे । महाजंघाय ।
महापादाय । महानखाय । महाधाराय । महाधीराय । मङ्गलाय ।
मङ्गलप्रदाय । महाधृतये नमः । २४०

ॐ महामेघाय नमः । महामन्त्राय । महाशनाय । महापापप्रशमनाय ।
मितभाषिने । मधुप्रदाय । महाबुद्धये । महासिद्धये । महायोगिने ।
महेश्वराय । महाभिषेकसन्तुष्टाय । महाकालाय । महानटाय ।
महाभुजाय । महावक्षसे । महाकुक्षि । महाकटये । महाभूतिप्रदाय ।
मान्याय । मुनिवृन्दायनिषेविताय नमः । २६०

ॐ महावीरेन्द्रवरदाय नमः । महालावण्यशेवधये । मातृमण्डलसंसेव्याय ।
मन्त्रतन्त्रात्मकाय । महते । माध्यन्दिनसवस्तुत्याय । मखध्वंसिने ।
महेश्वराय । मायाबीजजपप्रीताय । माषान्नप्रीतमानसाय ।
मार्ताण्डभैरवाराध्याय । मोक्षदाय । मोहिनीप्रियाय । मार्ताण्डमण्डलस्थाय ।
मन्दारकुसुमप्रियाय । मिथिलापुरासंस्थानाय । मिथिलापतिपूजिताय ।
मिथ्याजगदधिष्ठानाय । मिहिराय । मेरुकार्मुकाय नमः । २८०

ॐ मुद्गौदनप्रियाय नमः । मित्राय । मयोभूवे । मन्त्रवित्तमाय ।
मूलाधारस्थिताय । मुग्धाय । मणिपूरनिवासकाय । मृगाक्षाय ।
महिषारूढाय । महिषासुरमर्दनाय । मृगाङ्कशेखराय । मृत्युञ्जयाय ।

मृत्युविनाशकाय । मेरुशृङ्गाग्रनिलयाय । महाशान्ताय । महीस्तुताय ।
मौञ्जीबद्धाय । मघवते । महेशाय । मङ्गलप्रदाय नमः । ३००

ॐ मञ्जुमञ्जीरचरणाय नमः । मन्त्रिपूज्याय । मदापहाय ।
मंबीजजपसन्तुष्टाय । मायाविने । मारमर्दनाय । भक्तकल्पतरवे ।
भाग्यदात्रे । भावार्थगोचराय । भक्तचैतन्यनिलयाय ।
भाग्यारोग्यप्रदायकाय । भक्तप्रियाय । भक्तिगम्याय । भक्तवश्याय ।
भयापहाय । भक्तेष्टदात्रे । भक्तार्तिभञ्जनाय । भक्तपोषकाय ।
भद्रदाय । भङ्गुराय नमः । ३२०

ॐ भीष्माय नमः । भद्रकालीप्रियङ्कराय । भद्रपीठकृतावासाय ।
भुवन्तये । भद्रवाहनाय । भवभीतिहराय । भर्गाय । भार्गवाय ।
भारतीप्रियाय । भव्याय । भवाय । भवानीशाय । भूतात्मने ।
भूतभावनाय । भस्मासुरेष्टदाय । भूर्मे । भर्त्रे । भूसुरवन्दिताय ।
भागीरथीप्रियाय । भौमाय नमः । ३४०

ॐ भगीरथसमर्चिताय नमः । भानुकोटिप्रतीकाशाय । भगनेत्रविदारणाय ।
भालनेत्राग्निसन्दग्धमन्मथाय । भूभृदाश्रयाय । भाषापतिस्तुताय ।
भास्वते । भवहेतये । भयङ्कराय । भास्कराय । भास्कराराध्याय ।
भक्तचित्तापहारकाय । भीमकर्मणे । भीमवर्मणे । भूतिभूषणभूषिताय ।
भीमघण्टाकराय । भण्डासुरविध्वंसनोत्सुकाय । भुम्भारवप्रियाय ।
भ्रूणहत्यापातकनाशनाय । भूतकृते नमः । ३६०

ॐ भूतभृद्भावाय नमः । भीषणाय । भीतिनाशनाय ।
भूतव्रातपरित्रात्रे । भीताभीतभयापहाय । भूताध्यक्षाय । भरद्वाजाय ।
भारद्वाजसमाश्रिताय । भूपतित्वप्रदाय । भीमाय । भैरवाय ।
भीमनिस्वनाय । भूभारोत्तरणाय । भृङ्गिरिटिसेव्यपदाम्बुजाय ।
भूमिदाय । भूतिदाय । भूतये । भवारण्यकुठारकाय । भूर्भुवस्स्वः
पतये । भूपाय नमः । ३८०

ॐ भिण्डिवालभुसुण्डिभृते नमः । भूलोकवासिने । भूलोकनिवासिजनसेविताय ।
भूसुराराघनप्रीताय । भूसुरेष्टफलप्रदाय । भूसुरेड्याय ।
भूसूरेशाय । भूतभेतालायसेविताय । भैरवाष्टकसंसेव्याय । भैरवाय ।
भूमिजार्चिताय । भोगभुजे । भोग्याय । भोगिभूषणभूषिताय ।
भोगमार्गप्रदाय । भोगिकुण्डलमण्डिताय । भोगमोक्षप्रदाय । भोक्त्रे ।

भिक्षाचरणतत्पराय । गकाररूपाय नमः । ४००

ॐ गणपाय नमः । गुणातीताय । गुहप्रियाय । गजचर्मपरीधानाय । गम्भीराय । गाधिपूजिताय । गजाननप्रियाय । गौरीवल्लभाय । गिरिशाय । गुणाय । गणाय । गृत्साय । गृत्सपतये । गरुडाग्रजपूजिताय । गदाद्यायुधसम्पन्नाय । गन्धमाल्यविभूषिताय । गयाप्रयागनिलयाय । गुडाकेशप्रपूजिताय । गर्वातीताय । गण्डपतये नमः । ४२०

ॐ गणकाय नमः । गणगोचराय । गायत्रीमन्त्रजनकाय । गीयमानगुणाय । गुरवे । गुणज्ञेयाय । गुणध्येयाय । गोप्त्रे । गोदावरीप्रियाय । गुणाकराय । गुणातीताय । गुरुमण्डलसेविताय । गुणाधाराय । गुणाध्यक्षाय । गर्विताय । गानलोलुपाय । गुणत्रयात्मने । गुह्याय । गुणत्रयविभाविताय । गुरुध्यातपदद्वन्द्वाय नमः । ४४०

ॐ गिरीशाय नमः । गुणगोचराय । गुहावासाय । गुहाध्यक्षाय । गुडान्नप्रीतमानसाय । गूढगुल्फाय । गूढतनवे । गजारूढाय । गुणोज्ज्वलाय । गूढपादप्रियाय । गूढाय । गौडपादनिषेविताय । गोत्राणतत्पराय । ग्रीष्माय । गीष्पतये । गोपतये । गोरोचनप्रियाय । गुप्ताय । गोमातृपरिसेविताय । गोविन्दवल्लभाय नमः । ४६०

ॐ गङ्गाजूटाय नमः । गोविन्दपूजिताय । गोष्ठ्याय । गृह्याय । गुहान्तस्थाय । गह्वरेष्ठाय । गदान्तकृते । गोसवासक्तहृदयाय । गोप्रियाय । गोधनप्रदाय । गोहत्यादिप्रशमनाय । गोत्रिणे । गौरीमनोहराय । गङ्गास्नानप्रियाय । गर्गाय । गङ्गास्नानफलप्रदाय । गन्धप्रियाय । गीतपादाय । ग्रामणीयै । गहनाय नमः । ४८०

ॐ गिरये नमः । गन्धर्वगानसुप्रीताय । गन्धर्वाप्सरसां प्रियाय । गन्धर्वसेव्याय । गन्धर्वाय । गन्धर्वकुलभूषणाय । गंबीजजपसुप्रीताय । गायत्रीजपतत्पराय । गम्भीरवाक्याय । गगनसमरूपाय । गिरिप्रियाय । गम्भीरहृदयाय । गेयाय । गम्भीराय । गर्वनाशनाय । गाङ्गेयाभरणप्रीताय । गुणज्ञाय । गुणवान । गुहाय । वकाररूपाय नमः । ५००

ॐ वरदाय नमः । वागीशाय । वसुदाय । वसवे । वज्रिणे । वज्रप्रियाय । विष्णवे । वीतरागाय । विरोचनाय । वन्द्याय । वरेण्याय । विश्वात्मने । वरुणाय । वामनाय । वपवे । वश्याय । वशंकराय । वात्याय । वास्तव्याय ।

वास्तुपाय नमः । ५२०

ॐ विधये नमः । वाचामगोचराय । वाग्मिणे । वाचस्पत्यप्रदायकाय ।
वामदेवाय । वरारोहाय । विघ्नेशाय । विघ्ननाशकाय । वारिरूपाय ।
वायुरूपाय । वैरिवीर्याय । विदारणाय । विक्लबाय । विह्वलाय । व्यासाय ।
व्याससूत्रार्थगोचराय । विप्रप्रियाय । विप्ररूपाय । विप्रक्षिप्रप्रसादकाय ।
विप्राराधनसन्तुष्टाय नमः । ५४०

ॐ विप्रेष्टफलदायकाय नमः । विभाकरस्तुताय । वीराय ।
विनायकनमस्कृताय । विभवे । विभ्राजिततनु । विरूपाक्षाय । विनायकाय ।
विरागिजनसंस्तुत्याय । विरागिने । विगतस्पृहाय । विरिञ्चिपूज्याय ।
विक्रान्ताय । वदनत्रयसंयुताय । विशृंखलाय । विविक्तस्थाय ।
विदुषे । वक्त्रचतुष्टयाय । विश्वप्रियाय । विश्वकर्त्रे नमः । ५६०

ॐ वषट्कारप्रियाय नमः । वराय । विश्वमूर्तये । विश्वकीर्तये ।
विश्वव्यापिने । वियत्प्रभवे । विश्वस्रष्ट्रे । विश्वगोप्त्रे । विश्वभोक्त्रे ।
विशेषवित् । विष्णुप्रियाय । वियद्रूपाय । विराड्रूपाय । विभावसवे ।
वीरगोष्ठीप्रियाय । वैद्याय । वदनैकसमन्विताय । वीरभद्राय ।
वीरकर्त्रे । वीर्यवते नमः । ५८०

ॐ वारणार्तिहृते नमः । वृषांकाय । वृषभारूढाय । वृक्षेशाय ।
विन्ध्यमर्दनाय । वेदान्तवेद्याय । वेदात्मने । वदनद्वयशोभिताय ।
वज्रदंष्ट्राय । वज्रनखाय । वन्दारुजनवत्सलाय । वन्द्यमानपदद्वन्द्वाय ।
वाक्यज्ञाय । वक्त्रपञ्चकाय । वंबीजजपसन्तुष्टाय । वाक्प्रियाय ।
वामलोचनाय । व्योमकेशाय । विधानज्ञाय । विषभक्षणतत्पराय
नमः । ६००

ॐ तकाररूपाय नमः । तद्रूपाय । तत्पदार्थस्वरूपकाय ।
तटिल्लतासमरुचये । तत्त्वप्रज्ञानबोधकाय । तत्त्वमस्यादिवाक्यार्थाय ।
तपोदानफलप्रदाय । तत्त्वज्ञाय । तत्त्वनिलयाय । तत्त्ववाच्याय ।
तपोनिधये । तत्त्वासन । तत्सवितुर्जपसन्तुष्टमानसाय ।
तन्त्रयन्त्रात्मकाय । तन्त्रिणे । तन्त्रज्ञाय । ताण्डवप्रियाय ।
तन्त्रीलयविधानज्ञाय । तन्त्रमार्गप्रदर्शकाय । तपस्याध्याननिरताय
नमः । ६२०

ॐ तपस्विने नमः । तापसप्रियाय । तपोलोकजनस्तुत्याय । तपस्विजनसेविताय ।
तरुणाय । तारणाय । ताराय । ताराधिपनिभाननाय । तरुणादित्यसंकाशाय ।
तप्तकाञ्चनभूषणाय । तलादिभुवनान्तस्थाय । तत्त्वमर्थस्वरूपकाय ।
ताम्रवक्त्राय । ताम्रचक्षुषे । ताम्रजिह्वाय । तनूदराय ।
तारकासुरविध्वंसिने । तारकाय । तारलोचनाय । तारानाथकलामौलये नमः । ६४०

ॐ तारानाथसमुद्युतये नमः । तार्क्ष्यकाय । तार्क्ष्यविनुताय ।
त्वष्ट्रे । त्रैलोक्यसुन्दराय । ताम्बूलपूरितमुखाय । तक्ष्णे ।
ताम्राधराय । तनवे । तिलाक्षतप्रियाय । त्रिस्थाय । तत्त्वसाक्षिणे ।
तमोगुणाय । तुरङ्गवाहनारूढा । तुलादानफलप्रदाय ।
तुलसीबिल्वनिर्गुण्डीजम्बीरामलकप्रियाय । तुलामाघस्नानतुष्टाय ।
तुष्टातुष्टप्रसादनाय । तुहिनाचलसंकाशाय । तमालकुसुमाकृतये नमः । ६६०

ॐ तुङ्गभद्रातीरवासिने नमः । तुष्टभक्तेष्टदायकाय ।
तोमराद्यायुधधराय । तुषाराद्रिसुताप्रियाय । तोषिताखिलदैत्यौघाय ।
त्रिकालज्ञमुनिप्रियाय । त्रयीमयाय । त्रयीवेद्याय । त्रयीवन्द्याय ।
त्रयीतनवे । त्रय्यन्तनिलयाय । तत्त्वनिधये । ताम्राम । तमोपहाय ।
त्रिकालपूजनप्रीताय । तिलान्नप्रीतमानसाय । त्रिधाम्ने । तीक्ष्णपरशवे ।
तीक्ष्णेषवे । तेजसां निधये नमः । ६८०

ॐ त्रिलोकरक्षकाय नमः । त्रेतायजनप्रीतमानसाय । त्रिलोकवासिने ।
त्रिगुणाय । द्विनेत्राय । त्रिदशाधिपाय । त्रिवर्गदाय । त्रिकालज्ञाय ।
तृप्तिदाय । तुम्बुरुस्तुताय । त्रिविक्रमाय । त्रिलोकात्मने । त्रिमूर्तिं ।
त्रिपुरान्तकाय । त्रिशूलभीषणाय । तीव्राय । तीर्थ्याय । तीक्ष्णवरप्रदाय ।
रघुस्तुतपदद्वन्द्वाय । रव्यादिग्रहसंस्तुताय नमः । ७००

ॐ रजताचलशृङ्गाग्रनिलयाय नमः । रजतप्रभाय । रतप्रियाय ।
रहःपूज्याय । रमणीयगुणाकराय । रथकाराय । रथपतये । रथाय ।
रत्नाकरप्रियाय । रथोत्सवप्रियाय । रस्याय । रजोगुणविनाशकृते ।
रत्नडोलोत्सवप्रीताय । रणत्किंकिणिमेखलाय । रत्नदाय । राजकाय । रागिने ।
रङ्गविद्याविशारदाय । रत्नपूजनसन्तुष्टाय । रत्नसानुशरासनाय नमः ।

७२०

ॐ रत्नमण्डपमध्यस्थाय नमः । रत्नग्रैवेयकुण्डलाय । रत्नाकरस्तुताय ।
रत्नपीठस्थाय । रणपण्डिताय । रत्नाभिषेकसन्तुष्टाय ।
रत्नकाञ्चनभूषणाय । रत्नाङ्गुलीयवलयाय । राजत्करसरोरुहाय ।
रमापतिस्तुताय । रम्याय । राजमण्डलमध्यगाय । रमावाणीसमाराध्याय ।
राज्यदाय । रत्नभूषणाय । रम्भादिसुन्दरीसेव्याय । रक्षोअघ्ने ।
राकिणीप्रियाय । रविचन्द्राग्निनयनाय । रत्नमाल्याम्बरप्रियाय नमः । ७४०

ॐ रविमण्डलमध्यस्थाय नमः । रविकोटिसमप्रभाय । राकेन्दुवदनाय ।
रात्रिञ्चरप्राणापहारकाय । राजराजप्रियाय । रौद्राय । रुरुहस्ताय ।
रुरुप्रियाय । राजराजेश्वराय । राजपूजिताय । राज्यवर्धनाय ।
रामार्चितपदद्वन्द्वाय । रावणार्चितविग्रहाय । राजवश्यकराय । राजे ।
राशीकृतजगत्त्रयाय । राजीवचरणाय । राजशेखराय । रविलोचनाय ।
राजीवपुष्पसंकाशाय नमः । ७६०

ॐ राजीवाक्षाय नमः । रणोत्सुकाय । रात्रिञ्चरजनाध्यक्षाय ।
रात्रिञ्चरनिषेविताय । राधामाधवसंसेव्याय । राधामाधववल्लभाय ।
रुक्माङ्गदस्तुताय । रुद्राय । रजस्सत्वतमोमयाय । रुद्रमन्त्रजपप्रीताय ।
रुद्रमण्डलसेविताय । रुद्राक्षजपसुपीताय । रुद्रलोकप्रदायकाय ।
रुद्राक्षमालाभरणाय । रुद्राणीप्राणनायकाय । रुद्राणीपूजनप्रीताय ।
रुद्राक्षमकुटोज्वलाय । रुरुचर्मपरीधानाय । रुक्माङ्गदपरिष्कृताय ।
रेफस्वरूपाय नमः । ७८०

ॐ रुद्रात्मने नमः । रुद्राध्यायजपप्रियाय । रेणुकावरदाय । रामाय ।
रूपहीनाय । रविस्तुताय । रेवानदीतीरवासिने । रोहिणीपतिवल्लभाय ।
रोगेशाय । रोगशमनाय । रैदाय । रक्तबलिप्रियाय । रंबीजजपसन्तुष्टाय ।
राजीवकुसुमप्रियाय । रम्भाफलप्रियाय । रौद्रदृषे । रक्षाकराय ।
रूपवते । दकाररूपाय । देवेशाय नमः । ८००

ॐ दरस्मेरमुखाम्बुजाय नमः । दरान्दोलितदीर्घाक्षाय ।
द्रोणपुष्पार्चनप्रियाय । दक्षाराध्याय । दक्षकन्यापतये ।
दक्षवरप्रदाय । दक्षिणादक्षिणाराध्याय । दक्षिणामूर्तिरूपभृते ।
दाडिमीबीजरदनाय । दाडिमीकुसुमप्रियाय । दान्ताय । दक्षमखध्वंसिने ।
दण्डाय । दमयित्रे । दमाय । दारिद्र्यध्वंसकाय । दात्रे । दयालवे ।

दानवान्तकाय । दारुकारण्यनिलयाय नमः । ८२०

ॐ दशदिक्पालपूजिताय नमः । दाक्षायणीसमाराध्याय । दनुजारये ।
दयानिधये । दिव्यायुधधराय । दिव्यमाल्याम्बरविभूषणाय । दिगम्बराय ।
दानरूपाय । दुर्वासमुनिपूजिताय । दिव्यान्तरिक्षगमनाय । दुराधर्षाय ।
दयात्मकाय । दुग्धाभिषेचनप्रीताय । दुःखदोषविवर्जिताय ।
दुराचारप्रशमनाय । दुग्धान्नप्रीतमानसाय । दुर्लभाय । दुर्गमाय ।
दुर्गाय । दुःखहन्त्रे नमः । ८४०

ॐ दुरार्तिअघ्ने नमः । दुर्वाससे । दुष्टभयदाय । दुर्जयाय । दुरतिक्तमाय ।
दुष्टहन्त्रे । देवसैन्यपतये । दम्भविवर्जिताय । दुःस्वप्ननाशनाय ।
दुष्टदुराय । दुर्वारविक्रमाय । दूर्वायुग्मसमाराध्याय । दुत्तूरकुसुमप्रियाय ।
देवगङ्गाजटाजूटाय । देवताप्राणवल्लभाय । देवतार्तिप्रशमनाय ।
दीनदैन्यविमोचनाय । देवदेवाय । दैत्यगुरवे । दण्डनाथप्रपूजिताय
नमः । ८६०

ॐ देवभोग्याय नमः । देवयोग्याय । दीप्तमूर्तये । दिवस्पतये ।
देवर्षिवर्याय । देवर्षिवन्दिताय । देवभोगदाय । देवादिदेवाय । देवेज्याय ।
दैत्यदर्पनिषूदनाय । देवासुरगणाध्यक्षाय । देवासुरगणाग्रणिये ।
देवासुरातपस्तुष्टाय । देवासुरवरप्रदाय । देवासुरेश्वराराध्याय ।
देवान्तकवरप्रदाय । देवासुरेश्वराय । देवाय । देवासुरमहेश्वराय ।
देवेन्द्ररक्षकाय नमः । ८८०

ॐ दीर्घाय नमः । देववृन्दनिषेविताय । देशकालपरिज्ञात्रे ।
देशोपद्रवनाशकाय । दोषाकरकलामौलये । दुर्वारभुजविक्रमाय ।
दण्डकारण्यनिलयाय । दण्डिने । दण्डप्रसादकाय । दण्डनीतये । दुरावासाय ।
द्योताय । दुर्मतिनाशनाय । द्वन्द्वातीताय । दीर्घदर्शिने । दानाध्यक्षाय ।
दयापराय । यकाररूपाय । यन्त्रात्मने । यन्त्राराधनतत्पराय नमः । ९००

ॐ यजमानाद्यष्टमूर्तये नमः । यामिनीचरदर्पघ्ने । यजुर्वेदप्रियाय ।
युद्धमर्मज्ञाय । युद्धकौशलाय । यत्नसाध्याय । यष्टिधराय ।
यजमानप्रियाय । यजुषे । यथार्थरूपाय । युगकृते । युगरूपाय ।
युगान्तकृते । यथोक्तफलदाय । योषापूजनप्रीतमानसाय ।
यदृच्छालाभसन्तुष्टाय । याचकार्तिनिषूदनाय । यन्त्रासनाय ।
यन्त्रमयाय । यन्त्रमन्त्रस्वरूपकाय नमः । ९२०

ॐ यमरूपाय नमः । यामरूपाय । यमबाधानिवर्तकाय । यमादियोगनिरताय ।
योगमार्गप्रदर्शकाय । यवाक्षतार्चनरताय । यावच्चिह्नितपादुकाय ।
यक्षराजसखाय । यज्ञाय । यक्षेशाय । यक्षपूजिताय ।
यक्षराक्षससंसेव्याय । यातुधानवरप्रदाय । यज्ञगुह्याय ।
यज्ञकर्त्रे । यजमानस्वरूपकाय । यज्ञान्तकृते । यज्ञपूज्याय ।
यज्ञभुजे । यज्ञवाहनाय नमः । ९४०

ॐ यागप्रियाय नमः । यानसेव्याय । युने । यौवनगर्विताय ।
यातायातादिरहिताय । यतिधर्मपरायणाय । यात्राप्रियाय । यमिने ।
याम्यदण्डपाशनिकृन्तनाय । यात्राफलप्रदाय । युक्ताय । यशस्विने ।
यमुनाप्रियाय । यादःपतये । यज्ञपतये । यतये । यज्ञपरायणाय ।
यादवानां प्रियाय । योद्घ्ने । योधारान्धनतत्पराय नमः । ९६०

ॐ यामपूजनसन्तुष्टाय नमः । योषित्सङ्गविवर्जिताय । यामिनीपतिसंसेव्याय ।
योगिनीगणसेविताय । यायजूकाय । युगावर्ताय । याञ्चारूपाय ।
यथेष्टदाय । यावौदनप्रीतचित्ताय । योनिष्ठाय । यामिनीप्रियाय ।
याज्ञवल्क्यप्रियाय । यज्वने । यज्ञेशाय । यज्ञसाधनाय ।
योगमायामयाय । योगमायासंवृतविग्रहाय । योगसिद्धाय । योगिसेव्याय ।
योगानन्दस्वरूपकाय नमः । ९८०

ॐ योगक्षेमकराय नमः । योगक्षेमदात्रे । यशस्कराय । योगिने ।
योगासनाराध्याय । योगाङ्गाय । योगसङ्ग्रहाय । योगीश्वरेश्वराय ।
योग्याय । योगदात्रे । युगन्धराय । योषित्प्रियाय । यदुपतये ।
योषार्धीकृतविग्रहाय । यंबीजजपसन्तुष्टाय । यन्त्रेशाय ।
यन्त्रसाधनाय । यन्त्रमध्यस्थिताय । यन्त्रिणे । योगीश्वरसमाश्रिताय
नमः । १०००

इति श्रीरुद्रसहस्रनामावलिः समाप्ता ।

Proofread by Sneha Sudha snehasudha13 at gmail.com

*Shri Rudra Sahasranamavali*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*